17-06-2021

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । निबन्धः ।

# " दण्डिनः पदलालित्यम् । "

दण्डिनः तात्पर्यः अस्ति दण्डिकवेः । पदलालित्यम् - पदस्य पदानां वा लालित्यम् । 'पदम्' किम् सुप्तिङन्तं पदम् । सुप्तिङन्तचयो वाक्यम् इति भणति अमरसिंहः ।
किं नाम लालित्यम् ? ललितस्य भावः लालित्यम्, माधुर्यमिति। यस्मिन् वाक्ये, यस्यां पदसङ्घटनायां वा श्रवणसुखाकरत्वं कविप्रतिभया निसर्गतः समुदेति तदेव लालित्यम् । यतो हि पदसङ्घटनासौष्ठवं शृण्वतां मनांसि सहसा आवर्जयति, सुखयति लालयति च ।

यस्य वाग्वैभवेन वाक्यजातं ललितं सरसीकृतञ्चास्ति स एव दण्डी । भारतीयसंस्कृतवाङ्मये 'त्रयो दण्डिप्रबन्धाश्च इति ख्यातिः । गद्यकाव्यं दशकुमारचरितम्, अलङ्कारग्रन्थः काव्यादर्शः तथा अवन्तिसुन्दरीकथा चेति ।

दण्डिकवेः रुचिरस्वरवर्णप्रधानपदावलीषु मन आधीयते। एतस्य कमलकोमलकल्पनाततिः प्रसादमाधुरीधुरीणा सरसानुप्रासहासककमनीया पदावलिः पाठकमनोऽनुरञ्जनाय लालित्यप्रदर्शनाय च उपायनीक्रियते । दशकुमारचरितस्य प्रथमोच्छ्वासे राजहंसपरिचयप्रसङ्गे → " राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव ।
तदनन्तरं राजहंसमहिषीवर्णनचर्चायाम् → तस्य वसुमती नाम सुमती लीलावती कुलशेखरमणी रमणी बभूव ।
मालवनाथस्य प्रस्थानप्रसङ्गे → मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम ।
दण्डिकाव्ये सर्वत्र शब्दयोजना, योग्यता, यमकानुप्रासरसता, वर्णनकमनीयता वर्तन्ते । सुष्ठु एषा उक्तिः - "दण्डिनः पदलालित्यम्।

17-06-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सखवेना पर्रिओं ।

17-06-2021.

# शास्त्री I

साहित्यम्। छन्दविचारः।

## गुरु-लघु-लक्षणम् →

" सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पदान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको विदुः $^{\text{वा}}$ / ल्ऋजुः।"

सानुस्वारः → अनुस्वारेण सह वर्तते इति सः। यथा → कं, चं, यं, आदयः।
अनुस्वार से युक्त अक्षर दीर्घ माना जाता है।

विसर्गान्तो → विसर्गः विसर्जनीयः वाऽन्ते यस्य सः।
यथा → सः, कः, खः, तः, आदयः।
विसर्ग से युक्त अक्षर दीर्घ हो।

युक्तपरश्च → युक्तः संयोगी परो यस्य सः। यथा → इन्द्रः पदे इ दीर्घः अस्ति। अत्र इ वर्णः संयुक्ताक्षरस्य पूर्वे अस्ति।
संयुक्ताक्षर के पूर्व का वर्ण दीर्घ माना जाय।

वा पदान्ते → पादस्य सम्पूर्ण छन्दसश्चतुर्थांशरूपस्य, वा = विकल्पेन। पादश्चतुर्थः अंशः। अन्ते = समाप्ते। यथा →
त्वमेव माता----, त्वमेव विद्या----, त्वमेव बन्धुश्च---,
त्वमेव सर्वं मम देवदेव।
अत्र 'देव' पदम् श्लोकस्य चतुर्थपादस्य अन्तिमं पदम्। देव पदस्य व यद्यपि ह्रस्वः तथापि विवक्षया विकल्पेन गुरुः।
ह्रस्वः (लघु)। दीर्घः (गुरुः)
श्लोक के अन्तिम चरण का अंतिम अक्षर विकल्प से गुरु हो।

ग्वक्रो → ग् गुरुः वक्रः - ऽ इत्येवं कुटिलचिह्नरूपो ज्ञेयः।
गुरु - ऽ

ल्ऋजुः → ल् - लघुः ज्ञेयः। ऋजुः = सरलः, सरलरेखाकारः।
लघु - ।

[signature] 17-06-2021

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सरसेना, पूर्णियाँ।

अनिवार्यपत्रम् । शास्त्री II 17-06-2021

व्याकरणछात्रेहेतवः । रघुवंशम् । श्लोकव्याख्या ।

इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ।
अन्योऽन्यशोभापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥"

सन्दर्भः→ पूर्ववत् ।

प्रसङ्गः→ सुनन्दा या इन्दुमत्याः परिचारिका सखी वा आसीत्, सा स्वयंवरे पाण्ड्यनरेशस्य शोभां वर्णयति ।

अन्वयः→ असौ नृपः इन्दीवरश्यामतनुः त्वं रोचनागौरशरीरयष्टिः (असि) अन्योऽन्यशोभापरिवृद्धये वां योगः तडित्तोयदयोः इव अस्तु ।

शब्दार्थः व्याकरणञ्च → असौ = एषः । नृपः = पाण्ड्यनरेशः ।
इन्दीवरश्यामतनुः → इन्दीवरम् इव श्यामा तनुः यस्य सः = नीलकमलश्यामशरीरः । त्वं = भवती, इन्दुमती ।
रोचनागौरशरीरयष्टिः → रोचना इव गौरी शरीरम् एव यष्टिः यस्याः सा = गोरोचनागौरशरीरयष्टिः । असि = वर्तसे ।
अन्योऽन्यशोभापरिवृद्धये → अन्योऽन्यस्य शोभायाः परिवृद्धिः, तस्यै = परस्परसौन्दर्यप्रकर्षाय । वां = युवयोः ।
योगः = सङ्गतिः । तडित्तोयदयोः = विद्युन्मेघयोः ।
तोयदश्च तडिच्च, तयोः तडित्तोयदयोः ।

तात्पर्यः→ सुनन्दानुसारेण नीलकमलसदृशोऽयं पाण्ड्यनृपतिः गोरचनागौरशरीरया त्वया वरेण्यः । उभयोः सङ्गतिः विद्युन्मेघयोरिव तदा नूनं भविष्यति इति भावः ।

विशेषः→ अत्र शृङ्गाररसः, वैदर्भीरीतिः,
प्रसादयुक्तमाधुर्यगुणः,
उपमालङ्कारः, उपजातिवृत्तञ्च ।

17-06-21

डॉ॰ निर्मल कुमार झा, (स॰प्राचार्यः)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ ।

17-06-2021

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । संस्कृतानुवादः ।

1. यह हमदोनों का भाई है → अयं आवयोः भ्राताऽस्ति ।
2. यह तुमदोनों की बहन है → इयं युवयोः भगिनी अस्ति ।
3. यह बगीचा हम सब का है → इदमुद्यानमस्माकमस्ति ।
इदम् उद्यानम् अस्माकम् अस्ति ।
4. उसने मुझे पत्र लिखा → सः मां पत्रमलिखत् ।
5. एक-एक कर सभी छात्र कक्षा से बाहर चले गए →
एकैकशः सर्वे छात्राः वर्गाद्बहिर्गताः ।
6. मैंने अनेक बार मना किया → मयानेकशः वर्जितः ।
7. ऐसा करना ठीक होना चाहिए → बाढमेव कर्तुं स्यात् ।
8. शीघ्र जाकर प्रधानाचार्य से निवेदन करो →
शीघ्रं गत्वा / सपदि गत्वा प्रधानाचार्यं निवेदय ।
9. राम और मोहन आपस में झगड़ते हैं →
रामः तथा मोहनः / राममोहनौ परस्परं विवदतः ।
10. उसने एकान्त में मुझसे ऐसा कहा →
सः एकान्ते मामेत्थमकथयत् । एकान्ते वा रहसि ।
तेन एकान्ते अहम् इत्थं कथितम् ।
11. वह सुबह में उठकर माता-पिता को प्रणाम करती है →
सा प्रातः उत्थाय पितरौ प्रणमति ।
12. वह अपने भाई के समान है → सः स्वभ्रात्रा सदृशः अस्ति ।
13. माता के समान पुत्री है → मात्रा सदृशी पुत्री अस्ति ।
14. यह वेदवाक्य के समान है → इदं वेदवाक्यसदृशमस्ति ।
15. पिता देवताओं से भी श्रेष्ठ होते हैं → पिता देवेभ्यः अपि गरीयान् ।
16. वह प्राणों से बढ़कर है → सा प्राणेभ्यः अपि गरीयसी ।

17-06-2021

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।